# TARKASANGRAHADIPIKA

(Under the Project of Content Generation with a view to develop
E - Databank, E - Learning and E - Sources of Sanskrit Text.)

**Chief Director**

**Prof. PARAMESHWARA NARAYANA SHASTRY**
Vice Chancellor

Director

**Prof. Ch. L. N. SARMA**
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Co-ordinator

**Dr. R.G.MURALI KRISHNA**

(RSKS, New Delhi)

Co-ordinator

**Dr. R. BALAMURUGAN**
Head, Department of Navya Nyaya, Guruvayoor Campus

Asst. Co-ordinators

**Dr. N. R. SREEDHARAN**
**Dr. O. R. VIJAYARAGHAVAN**

**RASHTRIYA SANSKRIT SANSTHAN**

**(DEEMED UNIVERSITY)**

**Guruvayoor Campus, Puranattukara**

# तर्कसंग्रहः।

**भारतसर्वकारस्य योजना (Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)**


**प्रधाननिर्देशक:**

## आचार्य परमेश्वरनारायणशास्त्री

**कुलपतिः**

**निदेशक:**

## आचार्य चल्ला.लक्ष्मीनारायणशर्मा

**प्राचार्य:, गुरुवायूर् परिसर:**

**राष्ट्रियसंयोजकः**

## डा. रा.गायत्रीमुरलीकृष्णः

**परियोजनाधिकारी**

**राष्ट्रिय संस्कृत संस्थानम्, नवदेहली**

**प्रधानसंयोजकः**

## डा. आर्. बालमुरुगन्

**परिसरनव्यन्यायविभागाध्यक्ष:, गुरुवायूर् परिसर:**

**उपसंयोजकौ**

## डा. एन्.आर्.श्रीधरन्

## डा. ओ. आर्. विजयराघवन्



## राष्ट्रिय संस्कृत संस्थानम्, (मानित विश्वविद्यालयः)

**गुरुवायूर् परिसरः पुरनाट्टुकरा।**

**अथ**

**दीपिकया सहितः।**

# तर्कसंग्रहः।

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**

**बालानां सुखबोधाय क्रियते तर्कसंग्रहः।।**

## तर्कसंग्रहदीपिका

**विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम् ।**

**टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ।।**

**(त.दी.)** चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताक-मिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते - **निधायेति।**

ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति। मङ्गले कृतेऽपि कादम्बर्यादौ निर्विघ्नपरिसमाप्त्य-दर्शनात्। मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनात् । अन्वयव्यतिरेकव्यभिचारादिति चेन्न। कादम्बर्यादौ विघ्नबाहुल्यात्समाप्त्यभावः। किरणावल्यादौ तु ग्रन्थाद् बहिरेव मङ्गलं कृतमतो न व्यभिचारः।

ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न । शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्। **"समाप्तिकामो मङ्गलमाचरेत्"** इति श्रुतेः। तथाहि - मङ्गलं वेदबोधितकर्तव्यताकमलौकिकाविगीत-शिष्टाचारविषयत्वाद्दर्शादिवत्। भोजनादौ व्यभिचारवारणायालौकिकेति। रात्रिश्राद्धादौ व्यभिचारवारणाया-विगीतेति। शिष्टपदं स्पष्टार्थम्। **"न कुर्यान्निष्फलं कर्म"** इति जलताडनादेरपि निषिद्धत्वादिति।।

तर्क्यन्ते प्रतिपाद्यन्त इति **तर्काः** द्रव्यादिसप्तपदार्थास्तेषां संग्रह: संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थ:। कस्मै प्रयोजनायेत्यत आह - **सुखबोधायेति।** सुखेनानायासेन बोध: पदार्थज्ञानं तस्मा इत्यर्थ:।। ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थ: क्रियत इत्यत आह - **बालानामिति।** तेषामतिविस्तृतत्वाद् बालानां बोधो न जायत इत्यर्थ:। ग्रहणधारणपटुर्बाल:। न तु स्तनन्धय:। किं कृत्वा क्रियत इत्यत आह - **निधायेति। विश्वेशं** जगन्नियन्तारं शिवं **हृदि निधाय** नितरां स्थापयित्वा, सर्वदा तद्ध्यानपरो भूत्वेत्यर्थ:। **गुरूणां** विद्यागुरूणां **वन्दनं** नमस्कारं **विधाय** कृत्वेत्यर्थ:।।

**(त.सं.) द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा: सप्त पदार्था:।**

**(त.दी.)** पदार्थान्विभजते - **द्रव्येति।** पदस्यार्थ: पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते।।

नन्वत्र विभागादेव सप्तत्वे सिद्धे सप्तग्रहणं व्यर्थमिति चेन्न। अधिकसंख्याव्यवच्छेदार्थत्वात्। नन्वतिरिक्त: पदार्थ: प्रमितो वा न वा। नाद्य:, प्रमितस्य निषेधायोगात्। नान्त्य:, प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न। पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात्। ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वमिति वक्तव्यम्। एवं च सप्तभिन्नस्याप्रसिद्ध्या कथं सप्तान्यतमत्वव्याप्तिनिश्चय इति चेन्न। द्रव्यादिसप्तान्यतमत्वं नाम द्रव्यादिभेदसप्तकाभाव-वत्त्वम्। अतो दोषविरहात्। एवमग्रेऽपि द्रष्टव्यम्।

**(त.सं.) तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।**

**(त.दी.)** द्रव्यं विभजते - **तत्रेति।** तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वय:।। कानि तानीत्यत आह - **पृथिवीति।।**

ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणीति? तथाहि - नीलं तमश्चलतीत्य-बाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च तमसो द्रव्यत्वं तावत्सिद्धम्। तत्र तमसो

नाकाशादिपञ्चकेऽन्तर्भावो रूपवत्त्वात्। अत एव न वायौ, स्पर्शाभावात् सदागतिमत्त्वाभावाच्च। नापि तेजसि, भास्वररूपाभावादुष्णस्पर्शाभावाच्च। नापि जले, शीतस्पर्शाभावान्नीलरूपवत्त्वाच्च। नापि पृथिव्यां, गन्धाभावात्स्पर्शरहितत्वाच्च। तस्मात्तमो दशमद्रव्यमिति चेन्न। तमसस्तेजोऽभावरूपत्वात्। तथाहि - तमो न रूपिद्रव्यमालोकासहकृतचक्षुर्ग्राह्यत्वात्, आलोकाभाववत्। रूपिद्रव्यचाक्षुष-प्रमायामालोकस्य कारणत्वात्। तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः। तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः। अतो नव द्रव्याणीति सिद्धम्।

द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्। लक्ष्यैकदेशावृत्तित्वमव्याप्तिः, यथा गोः कपिलत्वम्। अलक्ष्ये लक्षणस्य वर्तनमतिव्याप्तिः, यथा गोः शृङ्गित्वम्। लक्ष्यमात्रावृत्तित्वमसम्भवः, यथा गोरेकशफवत्त्वम्।। एतद्दूषणत्रयरहितधर्मो लक्षणम्। स एवासाधारणधर्म इत्युच्यते। लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वम्। व्यावर्तकस्यैव लक्षणत्वे व्यावृत्तावभिधेयत्वादौ चातिव्याप्तिरतस्तद्वारणाय तद्भिन्नत्वं धर्मविशेषणं देयम्। व्यवहारस्यापि लक्षणप्रयोजनत्वे तन्न देयम्। व्यावृत्तेरपि व्यवहारसाधनत्वात्।।

ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणावच्छिन्नघटे उत्पन्नविनष्टघटे चाव्याप्तेरिति चेन्न। गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्।। नन्वेवमप्येकं रूपं रसात्पृथगिति व्यवहाराद्रूपादावतिव्याप्तिरिति चेन्न। एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात्।।

**(त.सं.) रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुख-दुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः।**

**(त.दी.)** गुणं विभजते - **रूपेति।** द्रव्यकर्मभिन्नत्वे सति सामान्यवान्गुणः। गुणत्वजातिमान्वा।। ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात्कथं चतुर्विंशतिर्गुणा इति चेन्न। लघुत्वस्य गुरुत्वाभावरूपत्वात्। मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात्।।

**(त.सं.) उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि।**

**(त.दी.)** कर्म विभजते - **उत्क्षेपणेति।** संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म। कर्मत्वजातिमद्वा। भ्रमणादीनामपि गमनेऽन्तर्भावात् न पञ्चत्वविरोध:।।

**(त.सं.) परमपरं चेति द्विविधं सामान्यम्।**

**(त.दी.)** सामान्यं विभजते - **परमिति।** परमधिकदेशवृत्ति। अपरं न्यूनदेशवृत्ति। सामान्यादिचतुष्टये जातिर्नास्ति।।

**(त.सं.) नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।**

**(त.दी.)** विशेषं विभजते - **नित्येति।** पृथिव्यादिचतुष्टयपरमाणव: आकाशादिपञ्चकं च नित्यद्रव्याणि।।

**(त.सं.) समवायस्त्वेक एव।**

**(त.दी.)** समवायस्य भेदो नास्तीत्याह - **समवायेति।।**

**(त.सं.) अभावश्चतुर्विध:। प्रागभाव: प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति।**

**(त.दी.)** अभावं विभजते - **प्रागभाव इति**।।

**(त.सं.) तत्र गन्धवती पृथिवी।। सा द्विविधा, नित्यानित्या चेति। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादि:।**

**(त.दी.)** तत्रोद्देशक्रमानुसारात् प्रथमं पृथिव्या लक्षणमाह - **तत्रेति।।** नाम्ना पदार्थसंकीर्तनमुद्देश:। उद्देशक्रमे च सर्वत्रेच्छैव नियामिका ।

नन्‌ु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादादव्याप्ति:। न च तत्र गन्धप्रतीत्यनुपपत्तिरिति वाच्यम्। अवयवगन्धस्यैव तत्र प्रतीतिसंभवेन चित्रगन्धानङ्गीकारात्। किं

चोत्पन्नविनष्टघटादावव्याप्तिरिति चेन्न। गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षित-त्वात्। ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न। अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र भानाङ्गीकारात्। ननु कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न। सर्वाधारताप्रयोजकभिन्नसंबन्धेन लक्षणत्वस्य विवक्षितत्वात्।।

पृथिवीं विभजते - **सा द्विविधेति।** नित्यत्वं ध्वंसाप्रतियोगित्वम्। अनित्यत्वं ध्वंसप्रतियो-गित्वम्।। प्रकारान्तरेण विभजते - **पुनरिति।** आत्मनो भोगायतनं शरीरम्। यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनम्। सुखदु:खान्यतरसाक्षात्कारो भोग:। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमन:संयोगाश्रयत्वमिन्द्रियत्वम्। शरीरेन्द्रियभिन्नो विषय:। एवं च गन्धवच्छरीरं पार्थिव-शरीरम्, गन्धवदिन्द्रियं पार्थिवेन्द्रियम्, गन्धवान्विषय: पार्थिवविषय इति तत्तल्लक्षणं बोध्यम्।। पार्थिवशरीरं दर्शयति - **शरीरमिति।।** इन्द्रियं दर्शयति - **इन्द्रियमिति**।। गन्धग्राहकमिति प्रयोजनम्। घ्राणमिति संज्ञा। नासाग्रेत्याश्रयोक्ति:। एवमुत्तरत्र ज्ञेयम्।। पार्थिवविषयं दर्शयति - **मृत्पाषाणादीति।**

**(त.सं.) शीतस्पर्शवत्य आप:। ताश्च द्विविधा:। नित्या अनित्याश्चेति। नित्या: परमाणुरूपा:। अनित्या: कार्यरूपा:। पुनस्त्रिविधा: शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषय: सरित्समुद्रादि:।**

**(त.दी.)** अपां लक्षणमाह - **शीतेति।** उत्पन्नविनष्टजलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरण-द्रव्यत्वापरजातिमत्त्वं विवक्षितम्।। शीतं शिलातलमित्यादौ जलसंबन्धादेव शीतस्पर्शभानमिति नातिव्याप्ति:। अन्यत्सर्वं पूर्वरीत्या व्याख्येयम्।।

**(त.सं.) उष्णस्पर्शवत्तेज:। तदद्विविधम्। नित्यमनित्यं चेति। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षु: कृष्णताराग्रवर्ति। विषयश्चतुर्विध:। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादि। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि।**

**(त.दी.)** तेजसो लक्षणमाह - **उष्णस्पर्शवदिति।** उष्णं जलमिति प्रतीतेस्तेज:संयोगानुविधायित्वान्नातिव्याप्ति:।। विषयं विभजते - **भौमेति।** ननु सुवर्णं पार्थिवं पीतत्वात्, गुरुत्वात् हरिद्रावदिति चेन्न।। अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन, जलमध्यस्थघृते तन्नाशादर्शनेन च असति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयो: कार्यकारणभावावधारणात् सुवर्णस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्ते:, पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्ते: रूपवत्तया वाय्वादिष्वनन्तर्भावात् तैजसत्वसिद्धि:। तस्योष्णस्पर्शभास्वररूपयोरुपष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धि:। तस्मात्सुवर्णं तैजसमिति सिद्धम्।

**(त.सं.) रूपरहितस्पर्शवान्वायु:। स द्विविधो नित्योऽनित्यश्चेति। नित्य: परमाणुरूप:। अनित्य: कार्यरूप:। पुनस्त्रिविध: शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतु: वायु:। शरीरान्त:संचारी वायु: प्राण:। स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते।**

**(त.दी.)** वायुं लक्षयति - **रूपरहितेति।** आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति।।

प्राणस्य कुत्रान्तर्भाव इत्यत आह - **शरीरेति।** एक एव प्राण: स्थानभेदात्प्राणापानादिशब्दैः व्यवह्रियते इत्यर्थ:।

स्पर्शानुमेयो वायु:। तथाहि योऽयं वायौ वाति सत्यनुष्णाशीतस्पर्श उपलभ्यते स क्वचिदाश्रितो गुणत्वाद्रूपवत्। न चास्य आश्रय: पृथिवी। उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमात्। न जलतेजसी, अनुष्णाशीतस्पर्शवत्त्वात्। न विभुचतुष्टयं, सर्वत्रोपलब्धिप्रसङ्गात्। न मन:, परमाणुस्पर्शस्यातीन्द्रियत्वात्। तस्माद्य: प्रतीयमानस्पर्शाश्रय: स वायु:।

ननु वायु: प्रत्यक्ष:। प्रत्यक्षस्पर्शाश्रयत्वाद् घटवदिति चेन्न। उद्भूतरूपवत्त्वस्योपाधित्वात्। यत्र द्रव्यत्वे सति बहिरिन्द्रियजन्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकत्वम्। यत्र

प्रत्यक्षस्पर्शाश्रयत्वं तत्र उद्भूतरूपवत्वन्नास्तीति पक्षे साधनाव्यापकत्वम्। न चैवं तप्तवारिस्थतेजसोऽप्यप्रत्यक्षत्वापत्तिः, इष्टत्वात्। तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः।।

इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते। ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रिया जायते। ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते। त्रिभिरेव द्व्यणुकैस्त्र्यणुकमुत्पद्यते। एवं चतुरणुकादिक्रमेण महती पृथिवी, महत्य आपः, महत्तेजः, महान्वायुरुत्पद्यते। एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात्क्रियया परमाणुद्वयविभागे द्व्यणुकनाशः इत्येवं पृथिव्यादिनाशः। असमवायिकारणनाशाद्द्व्यणुकनाशः। समवायिकारणनाशात्त्र्यणुकनाश इति **संप्रदायः**। सर्वत्रासमवायिकारणनाशात् द्रव्यनाश इति **नवीनाः।।**

किं पुनः परमाणुसद्भावे प्रमाणम्? उच्यते-जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं यद्द्रव्यमुपलभ्यते तत्सावयवम् चाक्षुषद्रव्यत्वात् घटवत्। त्र्यणुकावयवोऽपि सावयवो महदारम्भकत्वात् कपालवत्। यो द्व्यणुकावयवः स एव परमाणुः। स च नित्यः। तस्यापि कार्यत्वेऽनवस्थाप्रसङ्गात्। सृष्टिप्रलयसद्भावे **"धाता यथापूर्वमकल्पयत्"** इत्यादिश्रुतिरेव प्रमाणम्। सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः। सर्वभावकार्यध्वंसो महाप्रलय इति विवेकात्।।

**(त.सं.) शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।**

**(त.दी.)** आकाशं लक्षयति - **शब्दगुणकमिति।।** नन्वाकाशमपि पृथिव्यादिवन्नाना किं, नेत्याह - **तच्चैकमिति।** भेदे प्रमाणाभावादित्यर्थः।। एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वमङ्गीकर्तव्यमित्याह - **विभ्विति।** सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम्। मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं क्रियावत्त्वं वा।। विभुत्वादेवात्मवन्नित्यमित्याह - **नित्यं चेति ।।**

**(त.सं.) अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च।**

**(त.दी.)** कालं लक्षयति - **अतीतेति।** सर्वाधारः कालः सर्वकार्यनिमित्तकारणम्।।

**(त.सं.) प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका विभ्वी नित्या च।**

**(त.दी.)** दिशो लक्षणमाह - **प्राचीति।** दिगपि कार्यमात्रे निमित्तकारणम्।।

**(त.सं.) ज्ञानाधिकरणमात्मा। स द्विविधः, जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मैक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।**

**(त.दी.)** आत्मनो लक्षणमाह - **ज्ञानेति।।** आत्मानं विभजते - **स द्विविध इति।।** परमात्मनो लक्षणाह - **तत्रेति।** नित्यज्ञानाधिकरणत्वमीश्वरत्वम्।।

नन्वीश्वरस्य सद्भावे किं प्रमाणम्। न तावत्प्रत्यक्षम्। तद्धि बाह्यमान्तरं वा। नाद्यः, अरूपिद्रव्यत्वात्। नान्त्यः, आत्मसुखदुःखादिव्यतिरिक्तत्वात्। नाप्यनुमानं, लिङ्गाभावात् इति चेन्न। अङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवदित्यनुमानस्य प्रमाणत्वात्। उपादानगोचरापरोक्षज्ञान-चिकीर्षाकृतिमत्त्वं कर्तृत्वम्। उपादानं समवायिकारणम्। सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वम्। **"यः सर्वज्ञः स सर्ववित्"** इत्यागमोऽपि तत्र प्रमाणम्।।

जीवस्य लक्षणमाह - **जीव इति।** सुखाद्याश्रयत्वं जीवलक्षणम्।।

ननु "मनुष्योऽहं ब्राह्मणोऽहम्" इत्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मेति चेन्न। शरीरस्य आत्मत्वे करपादादिनाशे सति शरीरनाशादात्मनोऽपि नाशप्रसङ्गात्। नापीन्द्रियाणामात्मत्वम्। **"योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि"** इत्यनुसंधानाभावप्रसङ्गात्। अन्यानुभूतेऽर्थेऽन्यस्यानुसंधानायोगात्। तस्माद्देहेन्द्रियव्यतिरिक्तो जीवः। सुखदुःखादिवैचित्र्यात्प्रति-शरीरं भिन्नः। स च न परमाणुः। सर्वशरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गात्। न मध्यमपरिमाणवान्। तथा सत्यनित्यत्वप्रसङ्गेन कृतहानाकृताभ्यागमप्रसङ्गात्। तस्मान्नित्यो विभुर्जीवः।

**(त.सं.) सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।**

**(त.दी.)** मनसो लक्षणमाह - **सुखेति।** स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम्।। तद्विभजते - **तच्चेति।** एकैकस्यात्मन एकैकं मन इत्यात्मनामनेकत्वान्मनसोऽप्यनेकत्वमित्यर्थः।। **परमाणुरूपमिति।** मध्यमपरिमाणवत्त्वेऽनित्यत्वप्रसङ्गादित्यर्थः।।

ननु मनो विभु स्पर्शरहितत्वे सति द्रव्यत्वादाकाशवदिति चेन्न। मनसो विभुत्वे आत्ममनः-संयोगस्यासमवायिकारणस्याभावाज्ज्ञानानुत्पत्तिप्रसङ्गात्। न च विभुद्वयसंयोगोऽस्त्विति वाच्यम्। तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसङ्गात्। पुरीतद्व्यतिरिक्तस्थले आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्। अणुत्वे तु यदा मनः पुरीतत् प्रविशति तदा सुषुप्तिः, यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः।।

**(त.सं.) चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।**

**(त.दी.)** रूपं लक्षयति - **चक्षुरिति।** संख्यादावतिव्याप्तिवारणाय मात्रपदम्। रूपत्वेऽतिव्याप्तिवारणाय गुणपदम्।

नन्वव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेन्न। रूपस्य व्याप्यवृत्तित्वनियमात्।। ननु चित्रपटेऽवयवरूपस्यैव प्रतीतिरिति चेन्न। रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात्। न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकम् गौरवात्। तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः।। रूपस्याश्रयमाह - **पृथिवीति।।** आश्रयं विभज्य दर्शयति - **तत्रेति।।**

**(त.सं.) रसनग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीजलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव।**

**(त.दी.)** रसं लक्षयति - **रसनेति।** रसत्वेऽतिव्याप्तिपरिहाराय गुणपदम्।। रसस्याश्रयमाह - **पृथिवीति।।** आश्रयं विभज्य दर्शयति - **पृथिव्यामिति।।**

**(त.सं.) घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्चेति पृथिवीमात्रवृत्तिः।**

**(त.दी.)** गन्धं लक्षयति - **घ्राणेति।** गन्धत्वेऽतिव्याप्तिवारणाय गुणपदम्।।

**(त.सं.) त्वगिन्द्रियमात्रग्राह्यो गुण: स्पर्श:। स त्रिविध: शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्ति:। तत्र शीतं जले। उष्णस्तेजसि। अनुष्णाशीत: पृथिवीवाय्वो:।**

**(त.दी.)** स्पर्शं लक्षयति - **त्वगिति।** स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदम्। संयोगादावतिव्याप्तिवारणाय मात्रपदम्।।

**(त.सं.) रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम् ।**

**(त.दी.) पाकजमिति।** पाकस्तेज:संयोग:। तेन पूर्वरूपं नश्यति। रूपान्तरमुत्पद्यत इत्यर्थ:।।

तत्र परमाणुष्वेव पाक:। न द्व्यणुकादौ। आमनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्ति:। तत्र परमाणव: समवायिकारणम्। तेज:संयो-गोऽसमवायिकारणम्। अदृष्टादिकं निमित्तकारणम्। द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति पीलुपाकवादिनो **वैशेषिका:।** पूर्वघटस्य नाशं विनैव अवयविन्यवयवेषु च परमाणुपर्यन्तेषु युग-पद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो **नैयायिका:।** अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थ:।। **अन्यत्र** - जलादावित्यर्थ:।। **नित्यगतमिति** परमाणुगतमित्यर्थ:।। **अनित्यगतमिति** द्व्यणुकादिगत-मित्यर्थ:।। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षम्। अनुद्भूतमप्रत्यक्षम्। उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्म:। तदभावोऽनुद्भूतत्वम्।।

**(त.सं.) एकत्वादिव्यवहारहेतु: संख्या। नवद्रव्यवृत्ति:। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।**

**(त.दी.)** संख्यां लक्षयति - **एकत्वेति।।**

**(त.सं.) मानव्यवहारकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्। अणु महद्दीर्घं ह्रस्वं चेति।**

**(त.दी.)** परिमाणं लक्षयति - **मानेति।।** परिमाणं विभजते - **तच्चेति।** भावप्रधानो निर्देश:। अणुत्वं, महत्त्वं, दीर्घत्वं , ह्रस्वत्वं चेत्यर्थ:।।

**(त.सं.) पृथग्व्यवहारकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।**

**(त.दी.)** पृथक्त्वं लक्षयति - **पृथगिति।** इदमस्मात्पृथगिति व्यवहारकारणं पृथक्त्वमित्यर्थ:।।

**(त.सं.) संयुक्तव्यवहारहेतु: संयोग:। सर्वद्रव्यवृत्ति:।**

**(त.दी.)** संयोगं लक्षयति - **संयुक्तेति।** इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थ:। संख्यादिलक्षणे सर्वत्र दिक्कालादावतिव्याप्तिवारणायासाधारणेति विशेषणीयम्।। संयोगो द्विविध:। कर्मज: संयोगजश्चेति। आद्यो हस्तक्रियया हस्तपुस्तकसंयोग:। द्वितीयो हस्तपुस्तकसंयोगात्कायपुस्तकसंयोग:। अव्याप्यवृत्ति: संयोग:। स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वम्।।

**(त.सं.) संयोगनाशको गुणो विभाग:। सर्वद्रव्यवृत्ति:।**

**(त.दी.)** विभागं लक्षयति - **संयोगेति।** कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्ति-वारणाय संयोगनाशक इति।। विभागोऽपि द्विविध:। कर्मजो विभागजश्चेति। आद्यो हस्तक्रियया हस्तपुस्तकविभाग:। द्वितीयो हस्तपुस्तकविभागात्कायपुस्तकविभाग:।।

**(त.सं.) परापरव्यवहारासाधारणकारणे परत्वापरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे। दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।**

**(त.दी.)** परत्वापरत्वयोर्लक्षणमाह - **परापरेति।** परव्यवहारासाधारणकारणं परत्वम्। अपरव्यवहारा-साधारणकारणमपरत्वमित्यर्थ:।। ते विभजते - ते **द्विविधे इति।।** दिक्कृतयोरुदाहरणमाह - **दूरस्थ इति।।** कालकृत उदाहरति - **ज्येष्ठ इति।।**

**(त.सं.) आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।**

**(त.दी.)** गुरुत्वं लक्षयति - **आद्येति।** द्वितीयादिपतनस्य वेगासमवायिकारणत्वाद् वेगेऽतिव्याप्तिवारणायाद्येति।।

**(त.सं.) आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद्द्विविधम्। सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसो:। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

**(त.दी.)** द्रवत्वं लक्षयति - **आद्येति।** स्यन्दनं प्रस्रवणम्। तेज:संयोगजं नैमित्तिकम्। तद्भिन्नं सांसिद्धिकम्।। पृथिव्यां नैमित्तिकमुदाहरति - **घृतादाविति।।** तेजसि तदाह - **सुवर्णादाविति।।**

**(त.सं.) चूर्णादिपिण्डीभावहेतुर्गुण: स्नेह:। जलमात्रवृत्ति:।**

**(त.दी.)** स्नेहं लक्षयति - **चूर्णेति।** कालादावतिव्याप्तिवारणाय गुणपदम्। रूपादावतिव्याप्तिवारणाय पिण्डीभावेति।।

**(त.सं.) श्रोत्रग्राह्यो गुण: शब्द:। आकाशमात्रवृत्ति:। स द्विविध:। ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मक: संस्कृतभाषादिरूप:।**

**(त.दी.)** शब्दं लक्षयति - **श्रोत्रेति।** शब्दत्वेऽतिव्याप्तिवारणाय गुणपदम्। रूपादावतिव्याप्तिवारणाय श्रोत्रेति।।

शब्दस्त्रिविध: संयोगज:, विभागज:, शब्दजश्चेति। तत्राद्यो भेरीदण्डसंयोगजन्य:। द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्द:। भेर्यादिदेशमारभ्य श्रोत्रदेशपर्यन्तं द्वितीयादिशब्दा: शब्दजा:।।

**(त.सं.) सर्वव्यवहारहेतुर्गुणो ज्ञानं बुद्धि:। सा द्विविधा। स्मृतिरनुभवश्चेति।**

**(त.दी.)** बुद्धेर्लक्षणमाह - **सर्वव्यवहारेति।** कालादावतिव्याप्तिवारणाय **गुण इति।** रूपादावतिव्याप्तिवारणाय **सर्वव्यवहार इति।** जानामीत्यनुव्यवसायगम्यं ज्ञानत्वमेव लक्षणमिति भाव:।। बुद्धिं विभजते - **सेति।।**

**(त.सं.) संस्कारमात्रजन्यं ज्ञानं स्मृति:।**

**(त.दी.)** स्मृतेर्लक्षणमाह - **संस्कारेति।** भावनाख्यः संस्कारः। संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति। प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम्।

**(त.सं.) तद्भिन्नं ज्ञानमनुभवः। स द्विविधः। यथार्थोऽयथार्थश्चति।**

**(त.दी.)** अनुभवं लक्षयति - **तद्भिन्नमिति।** स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः। अनुभवं विभजते **- स द्विविध इति।।**

**(त.सं.) तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा रजते इदं रजतमिति ज्ञानम्। सैव प्रमेत्युच्यते।**

**(त.दी.)** यथार्थानुभवस्य लक्षणमाह - **तद्वतीति।।**

ननु घटे घटत्वमिति प्रमायामव्याप्तिः। घटत्वे घटाभावादिति चेन्न। यत्र यत्संबन्धोऽस्ति तत्र तत्संबन्धानुभव इत्यर्थात्। घटत्वे घटसंबन्धोऽस्तीति नाव्याप्तिः।। **सैवेति।** यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः।।

**(त.सं.) तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्ताविदं रजतमिति ज्ञानम्। सैवाप्रमेत्युच्यते।**

**(त.दी)** अयथार्थानुभवं लक्षयति - **तदभाववतीति।** नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न। यदवच्छेदेन यत्संबन्धाभावस्तदवच्छेदेन तत्संबन्धज्ञानस्य विवक्षितत्वात्। संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। संयोगावच्छेदेन संयोगसंबन्धस्य सत्वान्नातिव्याप्तिः।

**(त.सं.) यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।**

**(त.दी.)** यथार्थानुभवं विभजते - **यथार्थेति।।** प्रसङ्गात्प्रमाकरणं विभजते - **तत्करणमपीति।** प्रमाकरणमित्यर्थः। प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणम्।।

**(त.सं.) असाधारणं कारणं करणम्।**

**(त.दी.)** करणलक्षणमाह - **असाधारणेति।** दिक्कालादावतिव्याप्तिवारणायासाधारणेति।।

**(त.सं.) कार्यनियतपूर्ववृत्ति कारणम्।**

**(त.दी.)** कारणलक्षणमाह - **कार्येति।** पूर्ववृत्ति कारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति। तावन्मात्रे कृते कार्येऽतिव्याप्तिः। अतः पूर्ववृत्तीति।।

ननु तन्तुरूपमपि पटं प्रति कारणं स्यादिति चेन्न। अनन्यथासिद्धत्वे सतीति विशेषणात्। अनन्यथासिद्धत्वमन्यथासिद्धिरहितत्वम्। अन्यथासिद्धिः त्रिविधा। येन सहैव यस्य यं प्रति पूर्ववृत्ति-त्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्।। यथा तन्तुना तन्तुरूपम्, तन्तुत्वं च पटं प्रति। अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगभ्यते तं प्रति तदन्यथासिद्धम्। यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव पटं प्रत्याकाशस्य। अन्यत्र क्लृप्तनियतपूर्ववर्तिनः एव कार्यसंभवे तत्सह-भूतमन्यथासिद्धम्। यथा पाकजस्थले गन्धं प्रति रूपप्रागभावस्य। एवं चानन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।।

**(त.सं.) कार्यं प्रागभावप्रतियोगि।**

**(त.दी.)** कार्यलक्षणमाह - **कार्यमिति।।**

**(त.सं.) कारणं त्रिविधम्। समवाय्यसमवायिनिमित्तभेदात्।**

**(त.दी.)** कारणं विभजते - **कारणमिति।।**

**(त.सं.) यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य। पटश्च स्वगतरूपादेः।**

**(त.दी.)** समवायिकारणस्य लक्षणमाह - **यत्समवेतमिति।** यस्मिन्समवेतमित्यर्थः।।

**(त.सं.) कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य।**

**(त.दी.)** असमवायिकारणं लक्षयति - **कार्येणेति।** कार्येणेत्येतदुदाहरति - **तन्तुसंयोग इति।** कार्येण पटेन सह एकस्मिन् तन्तौ समवेतत्वात्तन्तुसंयोगः पटस्यासमवायिकारणमित्यर्थः।। कारणेनेत्येतदुदाहरति - **तन्तुरूपमिति।** कारणेन पटेन सहैकस्मिन् तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः।।

**(त.सं.) तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।**

**(त.दी.)** निमित्तकारणं लक्षयति - **तदुभयेति।** समवाय्यसमवायिभिन्नं कारणं निमित्तकारण-मित्यर्थः।।

**(त.सं.) तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।**

**(त.दी.)** करणलक्षणमुपसंहरति - **तदेतदिति।।**

## प्रत्यक्षपरिच्छेदः

**(त.सं.) तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।**

**(त.दी.)** प्रत्यक्षलक्षणमाह - **तत्रेति।** प्रमाणचतुष्टयमध्य इत्यर्थः।।

**(त.सं.) इन्द्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्द्विविधं निर्विकल्पकं सविकल्पकं चेति।**

**(त.दी.)** प्रत्यक्षज्ञानस्य लक्षणमाह - **इन्द्रियेति।** इन्द्रियं चक्षुरादिकम्। अर्थो घटादिः। तयोः संनिकर्षः संयोगादिः। तज्जन्यं ज्ञानमित्यर्थः। तद्विभजते - **तद्द्विविधमिति**।

**(त.सं.) निष्प्रकारकं ज्ञानं निर्विकल्पकम्।**

**(त.दी.)** निर्विकल्पकस्य लक्षणमाह - **निष्प्रकारकमिति।** विशेषणविशेष्य-संबन्धानवगाहि ज्ञानमित्यर्थः।।

ननु निर्विकल्पके किं प्रमाणमिति चेन्न। गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीतिज्ञानवदित्यनुमानस्य प्रमाणत्वात्। विशेषणज्ञानस्य सविकल्पकत्वेऽनवस्था-प्रसङ्गान्निर्विकल्पकसिद्धि:।।

**(त.सं.) सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं, ब्रह्मणोऽयं, श्यामोऽयं, पाचकोऽयमिति।**

**(त.दी.)** सविकल्पकं लक्षयति - **सप्रकारकमिति।** नामजात्यादिविशेष्यविशेषणसंबन्धावगाहि ज्ञानमित्यर्थ:।। सविकल्पकमुदाहरति - **यथेति।।**

**(त.सं.) प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्ष: षड्विध:। संयोग:, संयुक्तसमवाय:, संयुक्तसमवेत-समवाय:, समवाय:, समवेतसमवाय:, विशेषणविशेष्यभावश्चेति।**

**(त.दी.)** इन्द्रियार्थसंनिकर्षं विभजते - **प्रत्यक्षेति।।**

**(त.सं.) चक्षुषा घटप्रत्यक्षजनने संयोग: सन्निकर्ष:।**

**(त.दी.)** संयोगसंनिकर्षमुदाहरति - **चक्षुषेति।** द्रव्यप्रत्यक्षे सर्वत्र संयोग: सन्निकर्ष इत्यर्थ:। आत्मा मनसा संयुज्यते। मन इन्द्रियेण। इन्द्रियमर्थेन। तत: प्रत्यक्षज्ञानमुत्पद्यते इत्यर्थ:।।

**(त.सं.) घटरूपप्रत्यक्षे संयुक्तसमवाय:। चक्षु:संयुक्ते घटे रूपस्य समवायात्।**

**(त.दी.)** संयुक्तसमवायमुदाहरति - **घटरूपेति।।** तत्र युक्तिमाह - **चक्षु:संयुक्त इति।।**

**(त.सं.) रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवाय: सन्निकर्षः। चक्षु:संयुक्ते घटे रूपं समवेतम्। तत्र रूपत्वस्य समवायात्।**

**(त.दी.)** संयुक्तसमवेतसमवायमुदाहरति - **रूपत्वेति।।**

**(त.सं.) श्रोत्रेण शब्दसाक्षात्कारे समवाय: सन्निकर्ष:। कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात्। शब्दस्याकाशगुणत्वात् गुणगुणिनो: समवायात्।**

**(त.दी.)** समवायमुदाहरति - **श्रोत्रेणेति।।** तदुपपादयति - **कर्णेति।।** ननु दूरस्थशब्दस्य कथं श्रोत्रसंबन्ध इति चेन्न। वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दात् शब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य श्रोत्रेण संबन्धात् प्रत्यक्षत्वसंभवात्।।

**(त.सं.) शब्दत्वसाक्षात्कारे समवेतसमवाय: सन्निकर्ष:। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।**

**(त.दी.)** समवेतसमवायमुदाहरति - **शब्दत्वेति।।**

**(त.सं.) अभावप्रत्यक्षे विशेषणविशेष्यभाव: संनिकर्ष:। भूतलं घटाभाववदित्यत्र चक्षु:संयुक्तभूतले घटाभावस्य विशेषणत्वात्।**

**(त.दी.)** विशेषणविशेष्यभावमुदाहरति - **अभावेति।** तदुपपादयति - घटाभाववदिति। भूतलं विवोप्यं घटाभावो विशेषणम्। भूतले घटो नास्तीत्यत्र अभावस्य विशेष्यत्वं द्रष्टव्यम्।

एतेनानुपलब्धे: प्रमाणान्तरत्वं निरस्तम्।। "**यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत, दर्शनाभावान्नास्तीति"** तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेन्द्रियेणैवाभावज्ञानोत्पत्तावनुपलब्धे: प्रमाणान्तरत्वासम्भवात्। अधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तावनुपलब्धे: करणत्वा-योगात्।। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्त: संबन्ध:।।

**(त.सं.) एवं संनिकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।**

**(त.दी.)** प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह - **एवमिति।** असाधारणकारणत्वादिन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थ:।। प्रत्यक्षप्रमाणमुपसंहरति - **तस्मादिति।।**

**इति प्रत्यक्षपरिच्छेदः।**

# अनुमानपरिच्छेद:

**(त.सं) अनुमितिकरणमनुमानम्।**

**(त.दी.)** अनुमानं लक्षयति - **अनुमितिकरणमिति।।**

**(त.सं) परामर्शजन्यं ज्ञानमनुमिति:।**

**(त.दी.)** अनुमानं लक्षयति - **अनुमितिकरणमिति।।** अनुमितिं लक्षयति - **परामर्शेति।।** ननु संशयोत्तरप्रत्यक्षेऽतिव्याप्ति:। स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननात्। न च तत्रानुमितिरेवेति वाच्यम्। **"पुरुषं साक्षात्करोमि"** इत्यनुव्यवसायविरोधादिति चेन्न। पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिषाधयिषाविरह-विशिष्टसिद्ध्यभाव: पक्षता। साध्यसिद्धिरनुमितिप्रतिबन्धिका। सिद्धिसत्त्वेऽप्यनुमिनुयामितीच्छा-यामनुमितिदर्शनात् सिषाधयिषोत्तेजिका। ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत् सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्याप्यनुमितिकरणत्वम्।

**(त.सं) व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श:। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्श:। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमिति:।**

**(त.दी.)** परामर्शं लक्षयति - **व्याप्तीति।** व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थ:।। परामर्शमभिनीय दर्शयति - **यथेति।।** अनुमितिमभिनीय दर्शयति - **तज्जन्यमिति।** परामर्शजन्यमित्यर्थ:।।

**(त.सं) यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्ति:।**

**(त.दी.)** व्याप्तिलक्षणमाह - **यत्रेति।** यत्र धूमस्तत्राग्निरिति व्याप्तेरभिनय:। साहचर्यनियम इति लक्षणम्। साहचर्यं सामानाधिकरण्यं, तस्य नियम:। हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्य-सामानाधिकरण्यं व्याप्तिरित्यर्थ:।।

**(त.सं) व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।**

**(त.दी.)** पक्षधर्मतास्वरूपमाह - **व्याप्यस्येति।।**

**(त.सं.) अनुमानं द्विविधम्।**

**(त.दी.)** अनुमानं विभजते - **अनुमानमिति।।**

**(त.सं.) स्वार्थं परार्थं चेति। स्वार्थं स्वानुमितिहेतु:। तथा हि स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत: तद्गते चाग्नौ संदिहान: पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति अनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।**

**(त.दी.)** स्वार्थानुमानं दर्शयति - **स्वयमेवेति।।** ननु पार्थिवत्वलोहलेख्यत्वादौ शतश: सहचारदर्शनेऽपि वर्जमणौ व्यभिचारोपलब्धे: भूयोदर्शनेन कथं व्याप्तिग्रह इति चेन्न। व्यभिचारज्ञानविरहसहकृत-सहचारज्ञानस्य व्याप्तिग्राहकत्वात्।। व्यभिचारज्ञानं द्विविधं, निश्चय: शङ्का च।। तद्विरह: क्वचित् तर्कात्। क्वचित् स्वत:सिद्ध एव। धूमाग्न्यो: व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्गलक्षणस्तर्को व्यभिचारशङ्कानिवर्तक:।। ननु सकलवह्निधूमयोरसंनिकर्षात्कथं व्याप्तिग्रह इति चेन्न। वह्नित्व-धूमत्वरूपसामान्यप्रत्यासत्त्या सकलवह्निधूमज्ञानसम्भवात्।। **तस्मादिति** लिङ्गपरामर्शादित्यर्थ:।।

**(त.सं.) यत्तु स्वयमेव धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान्स सोऽग्निमान् यथा महानस:, तथा चायम्, तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते।**

**(त.दी.)** परार्थानुमानमाह - **यत्त्विति।** यच्छब्दस्य तत्परार्थानुमानमिति तच्छब्देनान्वय:।। पञ्चावयववाक्यमुदाहरति - **यथेति।।**

**(त.सं.) प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा:। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतु:। यो यो धूमवान् सोऽग्निमान् यथा महानस इत्युदाहरणम्। तथा चायमित्युपनय:। तस्मात्तथेति निगमनम्।**

**(त.दी.)** अवयवस्वरूपमाह - **प्रतिज्ञेति।।** उदाहृतवाक्ये प्रतिज्ञादिविभागमाह - पर्वतो वह्निमानिति।। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पञ्चम्यन्तं लिङ्गप्रतिपादकं हेतु:। व्याप्तिप्रतिपादकमुदाहरणम्। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनय:। हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। पक्षज्ञानं प्रतिज्ञाप्रयोजनं, लिङ्गज्ञानं हेतुप्रयोजनं, व्याप्तिज्ञानमुदाहरणप्रयोजनं, पक्षधर्मज्ञानमुपनयप्रयोजनं, अबाधितत्वादिकं निगमनप्रयोजनम्।।

**(त.सं.) स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव कारणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।**

**(त.दी.)** अनुमितिकरणमाह - **स्वार्थेति।।** ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसंभवे विशिष्टपरामर्श: किमर्थमङ्गीकर्तव्य इति चेन्न। वह्निव्याप्यवानयमिति शाब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात्। लिङ्गं न करणम्। अतीतादौ व्यभिचारात्। व्यापारवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिज्ञानं करणम्। तज्जन्यत्वे सति तज्जन्यजनको व्यापार:।। अनुमानमुपसंहरति - **तस्मादिति।।**

**(त.सं.) लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्नि: यथा महानस इत्यन्वयव्याप्ति:। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्ति:।**

**(त.दी.)** लिङ्गं विभजते - **लिङ्गमिति।।** अन्वयव्यतिरेकिणं लक्षयति - **अन्वयेति।** हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्ति:। तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्ति:।

**(त.सं.) अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् इति। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति। सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।**

**(त.दी.)** केवलान्वयिनो लक्षणमाह - **अन्वयेति।** केवलान्वयिसाध्यकं लिङ्गं केवलान्वयि। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। ईश्वरप्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः।।

**(त.सं.) व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्। यदितरेभ्यो न भिद्यते न तद्गन्धवत्। यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति। पृथिवीमात्रस्य पक्षत्वात्।**

**(त.दी.)** केवलव्यतिरेकिणो लक्षणमाह - **व्यतिरेकेति।** तदुदाहरति - **यथेति।**

नन्वितरभेदः प्रसिद्धो वा न वा। आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वेऽन्वयित्वम्। असत्त्वेऽसाधारण्यम्। द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः। विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात्। प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न। जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते। तत्र त्रयोदशत्वावच्छिन्नभेदात्मकसाध्यस्यैकाधिकरणवृत्तित्वाभावात् नान्वयित्वासाधारण्ये। प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिर्व्यतिरेकव्याप्तिनिरूपणं चेति।।

**(त.सं.) संदिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः।**

**(त.दी)** पक्षलक्षणमाह - **संदिग्धेति।।** ननु श्रवणानन्तरभाविमननस्थलेऽव्याप्तिः। तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात्। किं च प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिस्तत्राव्याप्तिरिति चेन्न। उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात्।।

**(त.सं.) निश्चितसाध्यवान्सपक्ष:। यथा तत्रैव महानस:।**

**(त.दी)** सपक्षलक्षणमाह - **निश्चितेति।।**

**(त.सं.) निश्चितसाध्याभाववान्विपक्ष:। यथा तत्रैव महाह्रद:।**

**(त.दी)** विपक्षलक्षणमाह - **निश्चितेति।।**

**(त.सं.) सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिता: पञ्च हेत्वाभासा:।**

**(त.दी.)** एवं सद्धेतून् निरूप्यासद्धेतून् निरूपयितुं विभजते - **सव्यभिचारेति।** अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्।।

**(त.सं.) सव्यभिचारोऽनैकान्तिक:। स त्रिविध:। साधारणासाधारणानुपसंहारिभेदात्।**

**(त.दी.)** सव्यभिचारं विभजते - **स त्रिविध इति।।**

**(त.सं.) तत्र साध्याभाववद्वृत्ति: साधारण:। यथा पर्वतो वह्निमान्प्रमेयत्वात्। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्।**

**(त.दी.)** साधारणं लक्षयति - **तत्रेति।।** उदाहरति - **यथेति।।**

**(त.सं.) सर्वसपक्षविपक्षव्यावृत्तोऽसाधारण:। यथा शब्दो नित्य: शब्दत्वात्। शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्य: व्यावृत्तं शब्दमात्रवृत्ति।**

**(त.दी.)** असाधारणं लक्षयति - **सर्वेति।।**

**(त.सं.) अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वात्। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति।**

**(त.दी.)** अनुपसंहारिणो लक्षणमाह - **अन्वयेति।।**

**(त.सं.) साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वात् घटवत्। कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।**

**(त.दी.)** विरुद्धं लक्षयति - **साध्येति।।**

**(त.सं.) यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यःश्रावणत्वाच्छब्दत्ववदिति। शब्दोऽनित्यः कार्यत्वाद्घटवत्।**

**(त.दी.)** सत्प्रतिपक्षं लक्षयति - **यस्येति।।**

**(त.सं.) असिद्धस्त्रिविधः। आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।**

**(त.दी.)** असिद्धं विभजते - **असिद्ध इति।।**

**(त.सं.) आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् रूपवदिति। अत्र गगनारविन्दमाश्रयः। स च नास्त्येव।**

**(त.दी.)** आश्रयासिद्धमुदाहरति - **गगनेति।।**

**(त.सं.) स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् रूपवदिति। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्।**

**(त.दी.)** स्वरूपासिद्धमुदाहरति - **यथेति।।**

**(त.सं.) सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। यथा पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोग उपाधिः। यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता। यत्र वह्निस्तत्रार्द्रेन्धनसंयोग इति नास्ति, अयोगोलके**

**आर्द्रेन्धनसंयोगाभावात् इति साधनाव्यापकत्वं। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।।**

**(त.दी.)** व्याप्यत्वासिद्धस्य लक्षणमाह - **सोपाधिक इति।।** उपाधेर्लक्षणमाह - **साध्येति।**

उपाधिश्चतुर्विधः। केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति। आद्य, आर्द्रेन्धनसंयोगः। द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वम्। तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम्। चतुर्थो यथा प्रागभावो विनाशी प्रमेयत्वादिति। अत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम्।।

**(त.सं.) यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णः पदार्थत्वात्। अत्रानुष्णत्वं साध्यम्। तदभाव उष्णत्वं त्वाचप्रत्यक्षेण गृह्यत इति बोध्यम्।।**

**(त.दी.)** बाधितस्य लक्षणमाह - **यस्येति।**

अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन, सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबन्धकत्वम्। इतरेषां तु परामर्शप्रतिबन्धकत्वम्। तत्रापि साधारणस्याव्यभिचाराभावरूपतया, विरुद्धस्य सामानाधिकरण्याभावतया, व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभावतया, असाधारणानुपसंहारिणो-र्व्याप्तिसंशयाधायकत्वेन च व्याप्तिज्ञानप्रतिबन्धकत्वम्। आश्रयासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञान-प्रतिबन्धकत्वम्। उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः। सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धावन्तर्भवतीति **प्राञ्चः।** निग्रहस्थानान्तरमिति **नवीनाः।।**

**इति अनुमानपरिच्छेदः।**

## उपमानपरिच्छेद:

**(त.सं.) उपमितिकरणमुपमानम्। संज्ञासंज्ञिसंबन्धज्ञानमुपमिति:। तत्करणं सादृश्यज्ञानम्। तथाहि-कश्चित् गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषात् "गोसदृशो गवय" इति श्रुत्वा वनं गत: गोसदृशपिण्डं पश्यन् वाक्यार्थं स्मरति। तदनन्तरमयं "गवयपदवाच्य" इत्युपमितिरुत्पद्यते। व्याख्यातं उपमानम्।**

**(त.दी)** उपमानं लक्षयति - **उपमितिकरणमिति।।**

**इति उपमानपरिच्छेदः।**

## शब्दपरिच्छेद:

**(त.सं.) आप्तवाक्यं शब्द:। आप्तस्तु यथार्थवक्ता। वाक्यं तु पदसमूह:। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केत: शक्ति:।**

**(त.दी.)** शब्दं लक्षयति - **आप्तेति।।** आप्तं लक्षयति - **आप्तस्त्विति।** वाक्यलक्षणमाह - **वाक्यमिति।** पदलक्षणमाह - **शक्तमिति।** अर्थस्मृत्यनुकूलपदपदार्थसंबन्ध: शक्ति:। सा च पदार्थान्तरमिति **मीमांसका:।।** तन्निरासार्थमाह - **अस्मादिति।** डित्थादीनामिव घटादीनामपि संकेत एव शक्ति:। न तु पदार्थान्तरमित्यर्थ:।

ननु गवादिशब्दानां जातावेव शक्ति:, विशेषणतया जाते: प्रथममुपस्थितत्वात्। व्यक्तिलाभ-स्त्वाक्षेपादिति **केचित्। तन्न। "गामानये"**त्यादौ वृद्धव्यवहारेण सर्वत्रानयनादेर्व्यक्तावेव संभवेन, जाति-विशिष्टव्यक्तावेव शक्तिकल्पनात्। शक्तिग्रहश्च वृद्धव्यवहारेण। तथाहि व्युत्पित्सुर्बालो गामानये-त्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्ति-जनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य **"अश्वमानय', "गां**

**बधाने"ति** वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः, अश्वशब्दस्याश्वत्वविशिष्टे शक्तिरिति व्युत्पद्यते।।

ननु सर्वत्र कार्यपरत्वात् व्यवहारस्य कार्यपरवाक्य एव व्युत्पत्तिर्न सिद्धपर इति चेन्न। **"काश्यां त्रिभुवनतिलको भूपतिरास्ते"** इत्यादौ सिद्धेऽपि व्यवहारात्। **"विकसितपद्मे मधुकरः तिष्ठति"** इत्यादौ प्रसिद्धपदसमभिव्याहारात्सिद्धेऽपि मधुकरादिव्युत्पत्तिदर्शनाच्च।।

लक्षणापि शब्दवृत्तिः। शक्यसंबन्धो लक्षणा। **"गङ्गायां घोष"** इत्यत्र गङ्गापदवाच्यप्रवाहसंबन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते। सैन्धवादौ लवणाश्वयोः परस्परसंबन्धाभावान्नानाशक्तिकल्पनम्।।

लक्षणा त्रिविधा। जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। यत्र वाच्यार्थस्यान्वया-भावस्तत्र जहल्लक्षणा। यथा **"मञ्चाः क्रोशन्ती"**ति। यत्र वाच्यार्थस्याप्यन्वयः, तत्र अजहदिति। यथा **"छत्रिणो गच्छन्ती"**ति। यत्र वाच्यैकदेशत्यागेनैकदेशान्वयस्तत्र जहदजहदिति। यथा तत्त्वमसीति।।

गौण्यपि लक्षणैव लक्ष्यमाणगुणसंबन्धस्वरूपा। यथा **"अग्निर्माणवक"** इति।। व्यञ्जनापि शक्तिलक्षणान्तर्भूता, शब्दशक्तिमूला अर्थशक्तिमूला च। अनुमानादिनान्यथासिद्धा। तात्पर्यानुपपत्तिर्लक्षणाबीजम्। तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यम्।

तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः। नानार्थानुरोधात्। प्रकरणादिकं तात्पर्यग्राहकम्।

**"द्वारमि"**त्यादौ **"पिधेही"**ति शब्दाध्याहारः।। नन्वर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्या-हारासंभवादर्थाध्याहार एव युक्त इति चेन्न। पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वात्। अन्यथा **"घटः कर्मत्वमानयनं कृतिरि"**त्यत्रापि शाब्दज्ञानप्रसङ्गात्। **"पङ्कजादि"**पदेषु योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्ती रूढिः। नियतपद्मत्वादिज्ञानार्थं समुदायशक्तिः। अन्यथा कुमुदेऽपि प्रयोगप्रसङ्गः।

इतरान्विते शक्तिरिति **प्राभाकराः।।** अन्वयस्य वाक्यार्थतया भानसंभवादन्वयांशेऽपि शक्तिर्न कल्पनीयेति **गौतमीयाः।।**

**(त.सं.) आकाङ्क्षा योग्यता संनिधिश्च वाक्यार्थज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननु-भावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं संनिधिः।**

**(त.दी.) आकाङ्क्षेति।** आकाङ्क्षादिज्ञानमित्यर्थः। अन्यथा आकाङ्क्षादिभ्रमाच्छाब्दभ्रमो न स्यात्।। आकाङ्क्षां लक्षयति - **पदस्येति।।** योग्यतालक्षणमाह - **अर्थेति।।** संनिधिलक्षणमाह - **पदानामिति।** अविलम्बेन पदार्थोपस्थितिः संनिधिः। उच्चारणं तु तदुपयोगितया उक्तम्।।

**(त.सं.) आकाङ्क्षादिरहितं वाक्यं न प्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणम्, आकाङ्क्षाविरहात्। अग्निना सिञ्चतीति वाक्यं न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात्।**

**(त.दी.) गौरश्व इति। "घटः कर्मत्वमि"**त्यप्यनाकाङ्क्षोदाहरणं द्रष्टव्यम्।।

**(त.सं.) वाक्यं द्विविधम्। वैदिकं लौकिकं चेति। वैदिकमीश्वरोक्तत्वात् सर्वमपि प्रमाणम्। लौकिकं त्वाप्तवाक्यं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं शब्दः।।**

**(त.दी.)** वाक्यं विभजते - **वाक्यमिति।**

वैदिकस्य विशेषमाह - **वैदिकमीश्वरोक्तत्वादिति।।**

ननु वेदस्यानादित्वात्कथमीश्वरोक्तत्वमिति चेन्न। "वेदः पौरुषेयो वाक्यसमुदायत्वाद्भारतादिवत्" इत्यनुमानेन पौरुषेयत्वसिद्धेः। न च स्मर्यमाणकर्तृकत्वमुपाधिः, गौतमादिभिः शिष्यपरम्परया वेदेऽपि सकर्तृकत्वस्मरणेन साधनव्यापकत्वात्। **"तस्मात्तेपानात्त्रयो वेदा अजायन्त"** इति श्रुतेश्च।।

ननु वर्णा नित्याः। **"स एवायं गकार"** इति प्रत्यभिज्ञाबलात्। तथा च कथं वेदस्यानित्यत्वमिति चेन्न। **"उत्पन्नो गकारो", "नष्टो गकार"** इति प्रतीत्या वर्णानामनित्यत्वात्। **"सोऽयं गकार"** इति प्रत्यभिज्ञायाः **"सेयं दीपज्वाला"** इति वत् साजात्यावलम्बनत्वात्। वर्णानां नित्यत्वेऽप्यानुपूर्वीविशिष्ट-

वाक्यस्यानित्यत्वाच्च। तस्मादीश्वरोक्ताः वेदा:।। मन्वादिस्मृतीनामाचाराणां च वेदमूलकतया प्रामाण्यम्। स्मृतिमूलवाक्यानामिदानीमनध्ययनात्तन्मूलभूता काचिच्छाखोत्सन्नेति कल्प्यते।।

ननु पठ्यमानवेदवाक्योत्सादनस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयो वेदो मूलमिति चेन्न। तथा सति कदापि वर्णानुपूर्वीज्ञानासम्भवेन बोधकत्वासंभवात्।

**"नन्वेतानि पदानि स्मारितार्थसंसर्गवन्ति आकाङ्क्षादिमत्पदकदम्बकत्वात् मद्वाक्यवदि"**त्यनुमानादेव संसर्गज्ञानसंभवाच्छब्दो न प्रमाणान्तरमिति चेन्न। अनुमित्यपेक्षया विलक्षणस्य शाब्दज्ञानस्य **"शब्दात्प्रत्येमी"**त्यनुव्यवसायसाक्षिकस्य सर्वसम्मतत्वात्।।

**नन्वर्थापत्तिरपि** प्रमाणान्तरमस्ति। **"पीनो देवदत्तो दिवा न भुङ्क्त"** इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या कल्प्यत इति चेन्न। **"देवदत्तो रात्रौ भुङ्क्ते दिवा अभुञ्जानत्वे सति पीनत्वादि"**त्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात्।

**शते पञ्चाशदिति** संभवोऽप्यनुमानमेव। **"इह वटे यक्षस्तिष्ठती"**त्यैतिह्यमपि अज्ञातमूलवक्तृकशब्द एव। **चेष्टापि** शब्दानुमानद्वारा व्यवहारहेतुरिति न प्रमाणान्तरम्। तस्मात्प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि।।

**इति शब्दपरिच्छेदः।**

## अथ प्रामाण्यवाद:

सर्वेषां ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतोग्राह्यं परतो वेति विचार्यते।। अत्र विप्रतिपत्ति:। **"ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा"** इति। अत्र विधिकोटि: स्वतस्त्वम्। निषेधकोटि: परतस्त्वम्। अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति। **"इदं ज्ञानमप्रमे"**ति ज्ञानेन प्रामाण्याग्रहाद्बाधवारणायाप्रामाण्याग्राहकेति। **"इदं ज्ञानमप्रमे"**त्यनुव्यवसायनिष्ठप्रामाण्यग्राहकस्यापि अप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यादतस्तदिति। तस्मिन्-

ग्राह्यप्रामाण्याश्रयेऽप्रामाण्याग्राहकेत्यर्थ:। उदाहृतस्थले व्यवसाये प्रामाण्यग्राहकस्याप्यनुव्यवसाये तदग्राहकत्वात्स्वतस्त्वसिद्धि:।।

ननु स्वत एव प्रामाण्यं गृह्यते। **"घटमहं जानामी"**त्यनुव्यवसायेन घटघटत्वयोरिव तत्संबन्धस्यापि विषयीकरणात्, व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्। पुरोवर्तिनि प्रकारसंबन्धस्यैव प्रमात्वपदार्थत्वादिति चेन्न। स्वत: प्रामाण्यग्रहे **"जलज्ञानं प्रमा न वे"**त्यनभ्यासदशायां प्रमात्वसंशयो न स्यात्। अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात्। तस्मात् स्वतोग्राह्यत्वाभावात् परतो ग्राह्यत्वमेव। तथाहि - प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति **"पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवम्, यथा अप्रमे"**ति व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्सजातीयत्वलिङ्गेन अन्वयव्यतिरेकिणापि गृह्यते।

प्रमाया: गुणजन्यत्वमुत्पत्तौ परतस्त्वम्। प्रमासाधारणकारणं गुण:। अप्रमासाधारणकारणं दोष:। तत्र प्रत्यक्षेऽपि विशेषणवद्विशेष्यसंनिकर्षो गुण:। अनुमितौ व्यापकवति व्याप्यज्ञानम्। उपमितौ यथार्थसादृश्यज्ञानम्। शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यादि ऊहनीयम्।।

पुरोवर्तिनि प्रकाराभावस्य अनुव्यवसायेनानुपस्थितत्वादप्रमात्वं परत एव गृह्यते। पित्तादिदोषजन्यत्वमुत्पत्तौ परतस्त्वम्।

ननु सर्वेषां ज्ञानानां यथार्थत्वादयथार्थज्ञानमेव नास्तीति। न च **"शुक्ताविदं रजतमि"**ति ज्ञानात् प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यम्। रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्रवृत्तिसम्भवात्। स्वतन्त्रोपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन **"नेदं रजतमि"**त्यादावतिप्रसङ्गाभावादिति चेन्न। सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात्।।

**इति प्रामाण्यवादः।**

**(त.सं.) अयथार्थानुभवस्त्रिविध:। संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशय:। यथा स्थाणुर्वा पुरुषो वेति।**

**(त.दी.)** अयथार्थानुभवं विभजते - **अयथार्थ इति।** स्वप्नस्य मानसविपर्ययरूपत्वान्न त्रैविध्यविरोध:।।

संशयलक्षणमाह - **एकेति ।** "घटपटावि"ति समूहालम्बनेऽतिव्याप्तिवारणायैकेति । "घटो

द्रव्यमि”त्यादावति-व्याप्तिवारणाय विरुद्धेति। घटत्वविरुद्धपटत्ववानित्यत्रातिव्याप्तिवारणाय नानेति।।

**(त.सं.) मिथ्याज्ञानं विपर्यय:। यथा शुक्ताविदं रजतमिति।**

**(त.दी.)** विपर्ययलक्षणमाह -**मिथ्येति।** तदभाववति तत्प्रकारकनिर्णय इत्यर्थ:।।

**(त.सं.) व्याप्यारोपेण व्यापकारोपस्तर्क:। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।**

**(त.दी.)** तर्कं लक्षयति - **व्याप्येति।** यद्यपि तर्को विपर्ययेऽन्तर्भवति, तथापि प्रमाणानुग्राहकत्वाद्भेदेन सङ्कीर्तनम्।।

**(त.सं.) स्मृतिरपि द्विविधा। यथार्था अयथार्था चेति। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था।**

**(त.दी)** स्मृतिं विभजते - **स्मृतिरिति।।**

**(त.सं) सर्वेषामनुकूलतया वेदनीयं सुखम्।**

**(त.दी)** सुखं लक्षयति - **सर्वेषामिति।** सुख्यहमित्याद्यनुव्यवसायगम्यं सुखत्वादिकमेव लक्षणम्। यथाश्रुतं तु स्वरूपकथनमिति द्रष्टव्यम्।।

**(त.सं.) प्रतिकूलतया वेदनीयं दु:खम्।**

**इच्छा काम:।**

**क्रोधो द्वेष:।**

**कृति: प्रयत्न:।**

**विहितकर्मजन्यो धर्म:।**

**निषिद्धकर्मजन्योऽधर्म:।**

**बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणा:।**

**बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य अनित्या जीवस्य ।**

**संस्कारस्त्रिविध:। वेगो, भावना, स्थितस्थापकश्चेति। वेग: पृथिव्यादिचतुष्टयमनोवृत्ति:। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्ति:। अन्यथाकृतस्य पुनस्तदवस्थापादक: स्थितस्थापक:। कटादिपृथिवीमात्रवृत्ति:।**

**(त.दी.)** संस्कारं विभजते-**संस्कार** इति। संस्कारत्वजातिमान्संस्कार:।। वेगस्याश्रयमाह - **वेग इति।** वेगत्वजातिमान्वेग:।। भावनां लक्षयति - **अनुभवेति।** अनुभवध्वंसेऽतिव्याप्तिवारणाय **स्मृतीति।** आत्मादावतिव्याप्तिवारणायानुभवेति। स्मृतेरपि संस्कारजनकत्वं **नवीनैरुक्तम्।।** स्थितस्थापकं लक्षयति - **अन्यथेति।** संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितस्थापका: **सामान्यगुणा:।** अन्ये रूपादयो **विशेषगुणा:।** द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमद्गुणत्वं **विशेषगुणत्वम्।।**

**(त.सं.) चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसंनिकृष्टसंयोगहेतुराकुञ्चनम्। शरीरविप्रकृष्टसंयोगहेतु: प्रसारणम्। अन्यत्सर्वं गमनम्।**

**(त.दी.)** कर्मणो लक्षणमाह - **चलनेति।।** उत्क्षेपणादीनां कार्यभेदमाह - **ऊर्ध्वेति।।** वक्रतासंपादकं कर्माकुञ्चनम्। ऋजुतासंपादकं प्रसारणमित्यर्थ:।।

**(त.सं.) नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति परं सत्ता। अपरं द्रव्यत्वादि।**

**(त.दी.)** सामान्यं लक्षयति - **नित्यमिति।** संयोगादावतिव्याप्तिवारणाय नित्यमिति।जलपरमाणुगतरूपे अतिव्यप्तिवारणाय एकेति। परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति। अनुगतत्वं समवेतत्वम्। तेन नाभावादावतिव्याप्ति:।

**(त.सं.) नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा:।**

**(त.दी.)** विशेषं लक्षयति - **नित्येति।।**

**(त.सं.) नित्यसंबन्ध: समवाय:। अयुतसिद्धवृत्ति:। ययोः द्वयोः मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथावयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति।**

**(त.दी.)** समवायं लक्षयति - **नित्येति।** संयोगादावतिव्याप्तिवारणाय नित्येति। आकाशादावतिव्याप्तिवारणाय संबन्ध इति। अयुतसिद्धलक्षणमाह - **ययोरिति। "नीलो घट इति विशिष्टप्रतीतिर्विशेषणविशेष्यसंबन्धविषया विशिष्टप्रत्ययत्वात्, दण्डीति विशिष्टबुद्धिवदि"**ति समवायसिद्धि:।। **अवयवावयविनाविति** - द्रव्यसमवायिकारणमवयव:।। तज्जन्यद्रव्यमवयवि।।

**(त.सं) अनादि: सान्त: प्रागभाव:। उत्पत्ते: पूर्वं कार्यस्य।**

**(त.दी.)** प्रागभावं लक्षयति - **अनादिरिति।** आकाशादावतिव्याप्तिवारणाय सान्त इति। घटादावतिव्याप्तिवारणायानादिरिति। प्रतियोगिसमवायिकारणवृत्ति: प्रतियोगिजनको भविष्यतीति व्यवहारहेतु: प्रागभाव:।।

**(त.सं) सादिरनन्त: प्रध्वंसाभाव:। उत्पत्तेरनन्तरं कार्यस्य।**

**(त.दी.)** ध्वंसं लक्षयति - **सादिरिति।** घटादावतिव्याप्तिवारणायानन्त इति। आकाशादावतिव्याप्तिवारणाय **सादिरिति।** प्रतियोगिजन्य: प्रतियोगिसमवायिकारणवृत्ति: **"ध्वस्त"** इति व्यवहारहेतु: ध्वंस:।।

**(त.सं) त्रैकालिको संसर्गावच्छिन्नाभावोऽत्यन्ताभाव:। यथा "भूतले घटो नास्ती"ति।**

**(त.दी.)** अत्यन्ताभावं लक्षयति - **त्रैकालिकेति।** अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गेति।

ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिकेति।

**(त.सं) तादात्म्यावच्छिन्न-प्रतियोगिताकाभावोऽन्योन्याभाव:। यथा "घट: पटो न भवती"ति।**

**(त.दी.)** अन्योन्याभावं लक्षयति - **तादात्म्येति।** प्रतियोगितावच्छेदकारोप्यसंसर्गभेदादेकप्रतियोगिक-योरत्यन्तान्योन्याभावयो: भिन्नत्वम्। केवलदेवदत्ताभावात् दण्ड्यभाव इति प्रतीत्या विशिष्टाभाव:, **"एकसत्त्वेऽपि द्वौ न स्त"** इति प्रतीत्या द्वित्वावच्छिन्नाभाव:, संयोगेन घटवति समवायेन घटाभाव:, तत्तद्घटाभावाद्घटत्वावच्छिन्नप्रतियोगिताक सामान्याभावश्चातिरिक्त:। एवमन्योन्याभावोऽपि। **"घटत्वेन पटो नास्ती"**ति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते। पटे घटत्वं नास्तीति तदर्थ:। अतिरिक्तत्वे स केवलान्वयी। सामयिकाभावोऽपि अत्यन्ताभाव एव समयविशेषे प्रतीयमान:। घटाभाववति घटानयनेऽत्यन्ताभावस्यान्यत्र गमनाभावेऽप्यप्रतीते:, घटापसरणे सति प्रतीते:, भूतले घटसंयोगप्रागभावध्वंसयो: घटात्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति तत्संयोगप्रागभावध्वं-सयोरसत्त्वादेवात्यन्ताभावस्याप्रतीति:। घटापसरणे तु संयोगध्वंसस्य सत्त्वात्प्रतीतिरिति।

केवलाधिकरणेनैव नास्तीति व्यवहारोपपत्तावभावो न पदार्थान्तरमिति **गुरव:। तन्न।** अभावानङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात्। अभावाभावो भाव एव। नातिरिक्त:, अनवस्थाप्रसङ्गात्।। ध्वंसप्रागभाव: प्रागभावध्वंसश्च प्रतियोग्येव इति **प्राञ्च:।**

अभावाभावोऽतिरिक्त एव। तृतीयाभावस्य प्रथमाभावस्वरूपत्वान्नानवस्थेति **नवीना:।।**

**(त.सं.) सर्वेषां पदार्थानामुक्तेष्वेवान्तर्भावात्सप्तैव पदार्था इति सिद्धम्।**

**(त.दी.)** ननु **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम"** इति न्यायसूत्रे षोडशपदार्थानामुक्तत्वात्कथं सप्तैवेत्यत आह - **सर्वेषामिति।** सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थ:।। **"आत्मशरीरेन्द्रियार्थबुद्धि-मन:प्रवृत्तिदोषप्रेत्यभावफलदु:खापवर्गास्तु प्रमेयमिति"** द्वादशविधं **प्रमेयम्। प्रवृत्ति**र्धर्माधर्मौ। रागद्वेषमोहा **दोषा:।** राग इच्छा। द्वेषो मन्यु:। मोह: शरीरादावात्मभ्रम:। **प्रेत्यभावो** मरणम्। **फलं** भोग:। **अपवर्गो** मोक्ष:। स च स्वसमानाधिकरणदु:खप्रागभावासमानकालीनो दु:खध्वंस:। प्रयोजनं सुखं

प्राप्तिः दु:खहानिश्च। **दृष्टान्तो** महानसादि:। प्रामाणिकत्वेनाभ्युपगतोऽर्थ: **सिद्धान्त: । निर्णयो** निश्चय: स च प्रमाणफलम्। तत्त्वबुभुत्सो: कथा **वाद:।**

उभयसाधनवती विजिगीषुकथा **जल्प:।** स्वपक्षस्थापनहीना अपरपक्षविदलनमात्रावसाना **वितण्डा।** **कथा** नाम नानावक्तृक: पूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भ:। अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणं **छलम्।** असदुत्तरं **जाति:। "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्य-प्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्या कार्यसमा जातय:।"** वादिनोऽपजयहेतुर्निग्रहस्थानम्। प्रतिज्ञाहानि: प्रतिज्ञान्तरं प्रतिज्ञाविरोध: प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थकमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमन-नुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च **निग्रहस्थानानि।** शेषं सुगमम्।।

ननु करतलानलसंयोगे सत्यपि प्रतिबन्धके सति दाहानुत्पत्ते: शक्ति:पदार्थान्तरमिति चेन्न। प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् **कारणत्वस्यैव शक्तिपदार्थत्वमिति।।**

ननु भस्मादिना कांस्यादौ शुद्धिदर्शनादाधेयशक्तिरङ्गीकार्येति चेन्न। भस्मादिसंयोगसमान-कालीनास्पृश्यस्पर्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगध्वंसस्य **शुद्धिपदार्थत्वात् ।**

**स्वत्वमपि न पदार्थान्तरम्।** यथेष्टविनियोगयोग्यत्वस्य स्वत्वस्वरूपत्वात्। तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति।।

**अथ विधिर्निरूप्यते** - प्रवृत्तिजनकचिकीर्षाजनकज्ञानविषयो विधि:। तत्प्रतिपादको लिङादिर्वा। कृत्यसाध्ये प्रवृत्त्यदर्शनात्कृतिसाध्यताज्ञानं प्रवर्तकम्। न च विषभक्षणादौ प्रवृत्तिप्रसङ्ग:। इष्टसाधनतालिङ्गककृतिसाध्यताज्ञानस्य काम्यस्थले, नित्यनैमित्तिकस्थले च विहितकालशुचिजीवि-त्वनिमित्तज्ञानजन्यस्यैव प्रवर्तकत्वात्। न चाननुगम:। स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानु-गतत्वादिति **गुरव:।**

**तन्न।** लाघवेन कृतिसाध्येष्टसाधनत्वज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात्। न च नित्यनैमित्तिकस्थले इष्टसाधनत्वज्ञानाभावादप्रवृत्तिप्रसङ्ग:। तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात्। तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङाद्यर्थ:।।

ननु **"ज्योतिष्टोमेन स्वर्गकामो यजेत"** इत्यत्र लिङा स्वर्गसाधनमपूर्वं कार्यं प्रतीयते। यागस्याशुतरविनाशिन: कालान्तरभाविस्वर्गसाधनत्वायोगात् तद्योग्यं स्थायिकार्यमपूर्वमेव लिङर्थ:। कार्यं कृतिसाध्यं, कृते: सविषयत्वात्। विषयाकाङ्क्षायां यागो विषयत्वेन अन्वेति। कस्य कार्यमिति नियोज्याकाङ्क्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति। कार्यबोद्धा नियोज्य:। तेन ज्योतिष्टोम-नामकयागविषयकं स्वर्गकामस्य कार्यमिति वाक्यार्थ: संपद्यते।

वैदिकलिङ्त्वात् **"यावज्जीवमग्निहोत्रं जुहुयात्"** इति नित्यवाक्येऽप्यपूर्वमेव वाच्यं कल्प्यते।। **"आरोग्यकामो भेषजपानं कुर्यात्"** इत्यादिलौकिकलिङ: क्रियाकार्ये लक्षणेति चेन्न। यागस्याप्ययोग्यतानिश्चयाभावेन इष्टसाधनतया प्रतीत्यनन्तरं तन्निर्वाहार्थमवान्तरव्यापारतयापूर्वस्य कल्पनात्। कीर्तनादिना नाशश्रुते: न यागध्वंसो व्यापार:। लोकव्युत्पत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति लिङ्त्वेन विध्यर्थकत्वम्, आख्यातत्वेन यत्नार्थकत्वम्। **"पचति पाकं करोती"**ति विवरणदर्शनात्, **"किं करोती"**ति प्रश्ने पचतीत्युत्तराच्चाख्यातस्य प्रयत्नार्थकत्वनिश्चयात्। **"रथो गच्छती"**त्यादावनुकूलव्यापारे लक्षणा। "देवदत्त: पचति तण्डुलम्', "देवदत्तेन पच्यते तण्डुल:' इत्यत्र कर्तृकर्मणोर्नाख्यातार्थत्वम्। किंतु तद्गतैकत्वादीनामेव। तयोराक्षेपादेव लाभ:।

**"प्रजयती"**त्यादौ धातोरेव प्रकर्षे शक्ति:। उपसर्गाणां द्योतकत्वमेव। न तत्र शक्तिरस्ति।। पदार्थतत्वज्ञानस्य परमं प्रयोजनं मोक्ष:। तथाहि - **"आत्मा वा अरे द्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्य:"** इति श्रुत्या श्रवणादीनामात्मसाक्षात्कारहेतुत्वबोधनात्। श्रुत्या देहादिविलक्षणात्म-ज्ञानेऽप्यसंभवादिनिवृत्तेर्युक्त्यनुसन्धानुरूपं मननसाध्यत्वान्मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रा स्यापि मोक्षोपयोगित्वम्। तदनन्तरं श्रुत्युपदिष्टयोगविधिना निदिध्यासने कृते, तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमित्याभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात्प्रवृत्त्यभावे धर्माधर्मयोरभावाज्जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदु:खध्वंसलक्षणो मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानमात्रसाध्यत्वात्। **"तमेव विदित्वातिमृत्युमेति। नान्य: पन्था विद्यतेऽयनाय"** इति श्रुत्या साधनान्तरनिषेधाच्च। ननु **"तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने"** इति कर्मणोऽपि मोक्षसाधनत्वस्मरणात् ज्ञानकर्मणो:

समुच्चय इति चेन्न। **"नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्। ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत्। अभ्यासात्पक्वविज्ञानं कैवल्यं लभते नर:"** इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात्।। ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात्। तस्मात्पदार्थज्ञानस्य मोक्ष: परमं प्रयोजनमिति सर्वं रमणीयम्।।

**(त.सं.) काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।**

**अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रह:।।**

## इति महामहोपाध्यायान्नम्भट्टविरचित: स्वकृततर्कसङ्ग्रहदीपिकासमेतस्तर्कसङ्ग्रह: समाप्त:।